National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(60): 176-177
© 2025 NJHSR
www.sanskritarticle.com

**ममतासिं**
अनुसन्धात्री,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपति

**Correspondence:**
**ममतासिं**
अनुसन्धात्री,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपति

# शब्दस्य नित्यत्वमनित्यत्वञ्च

**ममतासिं**

शब्द भवति आप्तवाक्यं। अथवा अनाप्तानुक्तं वाक्यं। एवं शब्दस्य महत्वम् प्रमाणेषु मध्ये अस्ति इति। तर्हि शास्त्रेषु पुनरपि नित्योऽनित्यश्चेति भेदेन शाब्दस्य भेद द्वयं इति दृश्यते। अत्रे वेदेषु शब्दनित्यताया सिद्धान्तस्य बीजं[१] एव दृश्यते।उच्चार्यमाणशब्दस्य वेदस्य आनुपूर्व्याः नित्यतायाः इति नित्यत्वमभ्युपगच्छन्ति। अतः मीमांसकाः उक्तम् शब्दस्य मूलभागस्य वर्णस्य नित्यत्वमभ्युपगच्छन्ति इति यथा-यदि उच्यते अथ गौरित्यत्र तर्हि कः शब्दः? ग काराःओकार, विसर्जनीय इति भगवानुपवर्षः[२]। एवं अयं पूर्वपक्ष शावरभाष्यस्य "अथ गौरित्यत्र कः शब्दः" पतञ्जलीनाऽपि व्याकरणमहाभाष्ये यथावत् स्वीकृतः। परन्तु तत्र समाधानम् उपवर्षसिद्धान्तात् भिन्नं प्रतीयते।तथाहि शब्दः इति येनोच्चारितेन सास्नालङ्गुलककुदखुर विषाणिनां सम्प्रत्ययोः भवति[३]।

अत्रे शावरभाष्य एवं महाभाष्ययोः बाह्यार्थः प्रायः समानः भवति। परन्तु सम्प्रत्ययः इति कथनेन वर्णनित्यतां तत् व्यतिरिच्य समुदायस्य नित्यता ध्वन्यते। मीमांसकैः सोऽयं गकार इति प्रत्यभिज्ञया विविधकालेषु उपलभ्यमानवर्णानां नित्यतायाःदर्शनात् वर्णनित्यत्वं इति स्विकृतम् आसित्। शब्दजातिःतेषां स्विकृता नास्ति। शब्दत्वजातिरेव स्विकारः दृश्यते। शब्दं सर्वथा अनित्यं इति नैयायिकास्तु मन्यन्ते। तथाहि प्रथमक्षणे वर्णाः उत्पद्यन्ते। द्वितीयक्षणे तिष्ठन्ति । तर्हि तृतीयक्षणे विनश्यन्ति। अत एव शब्दः अनित्यः कृतकत्वात्, घटवत् इति नैयायिकाः अनुमिति आधारिकृत्य वर्णसमुदाय रूपस्यपदस्य, पदसमुदायरूपस्य वाक्यस्य चानित्यत्वं प्रतिपादयन्ति। अतः चतुर्विंशति गुणेषु शब्दमपि अन्तर्भाव्य तस्य गुणत्वं इति नैयायिकाः स्वीकुर्वन्ति।

शब्दं सर्वथा नित्यमेव इति वैयाकरणस्तु आमनन्ति। एवं वर्णरूपस्य शब्दस्य नित्यत्वं मीमांसकाः स्वीकुर्वन्ति ।शब्दस्य नित्यत्वं इति वैयाकरणस्तु वाक्यरूपस्यापि साधयन्ति। वैयाकरणाः शब्दनित्यतामाश्रित्य एव शब्दस्य ब्रह्मरूपतां प्रतिपादयन्ति । परन्तु ब्रह्मस्वरूपिणः तस्य शब्दस्य नित्यानित्यत्वविचारणा पृथक्तया न करणीया। नित्यताया ब्रह्मणः तद्भिन्नस्य शब्दस्यापि नित्यतायाः स्वत एव लाभात्। अत्र तु शब्दस्य नित्यानित्यत्वं इति न्याकरणप्रक्रिया-

यामुपयुज्यमानस्य मध्यमारूपस्य वैखरीरूपस्य विचारणियम्। तर्हि भाष्यकारः शब्दस्य नित्यतामादाय "सिद्धे शब्दार्थसम्बन्धे" इति वार्त्तिकमुपस्थापयति। तदेवमाश्रित्य वाक्यपदीयकारः शब्दार्थसम्बन्धानां नित्यतां प्रति जानाति इति। तथाहि- "**नित्या शब्दार्थ सम्बन्धा**"[४] इति।

शब्दः, अर्थः तयोः सम्बन्धस्य सर्वेऽपि नित्या इति एतस्या-भिप्रायः। उच्चारित प्रध्वंसित्वेन तस्यानित्यत्वं तु न युक्तम्। आकृति नित्यत्वेन तस्य नित्यत्वात्। यदि शब्दोऽनित्य इति कथनेन शब्दाकृतेःनित्यता अभ्युपगम्यते। "जात्याख्यायामेक-स्मिन् बहुवचनमन्यतरस्याम्"[५] एतत् नामाकृतिपक्षमादाय एव इत्यादिमनुशासनानां प्रवृति व्याकरणशास्त्रे सम्भवति इति ।अत एव शब्दाकृते नित्यत्वात् शब्दः नित्यः भवति। एकत्र शब्दःनष्टः इति कृत्वा सर्वत्र न तथा । अत एव नित्या शब्दाकृतिः। तदुक्तं भाष्ये – "आकृत्युपदेशात् सिद्धः"[६] इति नित्याकृतिः उक्तं च पुनरपिः।

शब्दः अनित्यः, अभिव्यङ्ग्यत्वात्, दीपाभिव्यक्तेः घटादिवत्। इत्यादिरूपेणानुमित्या शब्दस्य यद नित्यत्वं प्रतिपादयन्ति तत् खण्डयितुमुक्तं वाक्यपदीयकारेण-

**न चानित्येष्वभिव्यक्तिर्नियमेन व्यवस्थिताः।**
**आश्रयैरपि नित्यानां जातीनां व्यक्तिरिष्यते।।**[७]

इदार्नि अत्रायं भावः- अभिव्यक्तिः अनित्यानामेव भवति। न तु नित्यानामिति नास्ति नियमः। अभिव्यक्तिः नित्यानामपि भवत्येवा इति। तथाहि अभिव्यक्तिः घटत्वपटत्वादिजातीनामपि जायते । अतःयत्र यत्र अभिव्यक्तत्वं तत्र तत्रअनित्यत्वमिति न व्याप्तिः।अतः अनित्यः अभिव्यक्तत्वात्, घटवत् इति अनुमि-तिस्थले अभिव्यक्तोऽपि शब्दो नित्यः जातिवत् इति अनुमानमुचितम्।

किञ्च व्यवहारपक्षमाश्रित्यपि शब्दस्य नित्यत्वमेव प्रकाश्यते। तथाहि शव्दाः कस्मिन्नकाले प्रथममुत्पन्नाः, केन वा पुरूषेण शब्दाः अपि प्रथममुत्पादिता इति विषयः ज्ञातुमशक्य एव। यथा-प्राणिनः अनादिकालात् तिष्ठन्ति तथैव शब्दाः अपि अनादयः एव । तदुक्तम्-

**नित्यत्वे कृतकत्वे वा तेषामार्दिर्न विद्यते।**
**प्रामिनामिव सा चैषा व्यवस्धा नित्यतोच्यते॥**[८]

अत एव महाभारतकारोऽपि –

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवाः।**
**आदौ वेदमयी दिव्या एतत्सर्वा प्रकृतयः॥**[९] **इति**

एवं प्रकारेण शब्दस्य नित्यता उपपादिता।

**उपसंहार-** एवं प्रकारेण सर्वेषु शास्त्रेषु च शभ्दस्य नित्यत्वमनित्यत्वञ्च विषयो प्रस्तुतः अस्ति। एवं दार्शनिक सिद्धान्ते भेद एव मूलम् भवति। एकस्य शब्दस्य उच्चारणात् पूर्वं तस्य तत्वं अर्थं प्रभावं च सम्यग्र ज्ञातव्यम् गौशव्दस्योच्चारणे य एव गकार ओकारादयः वर्णाः व्यवहृताः भवन्ति त एववर्णाःवेदेऽपि व्यवहृताः भवन्ति। व्याकरणाभिज्ञै सास्नादि मत् वस्तुनि गौ इति एव शब्दः प्रयुज्यते। गो शब्दः एव साधुः गावीगोणी इत्यादयःअसाधुः इति नास्ति तत्र कश्चित् नियम वं शब्दस्य नित्यत्वमेव किञ्च व्यवहारपक्षमाश्रित्यपि प्रकाश्यते। एवं प्रकारेण अत्रे शब्दस्य नित्यता उपपादिताः अस्ति।

**सन्दर्भग्रन्थाः-**


१.शावरभाष्यम्-शवरस्वामी प्रणितः१९७६च.सं. आनन्दाश्रमसंस्था, पुणे।

२.महाभाष्य-१/१/१

३.महाभाष्य-१/१/१

४.वाचस्पत्यम्-१९७०सं. तारानाथतर्कवाचस्पतिसंकलितः चौखम्बा संस्कृत सिरिज आफिस्, वारणासी ।

५.अष्टाध्यायीसूत्रपाठ महर्षिपाणिनिप्रणी - तः१/२/५८

६.महाभाष्यम् (पस्पशाह्निकम्)महामुनि श्री पतञ्जलिविरचितम्- ईस्टर्न बुक लिंकर्स जवाहार नगर, दिल्ली-११०००७ ।

७. महाभाष्यम्(पस्पशाह्निकम्)

८.वाक्यपदीयम्- प्रथमकाण्डम्-१९६ – Shantilal Jain , Jainendra Press, Delhi -1971 I

९.वाचस्पति-१/२८